च० "प्रजल्पन् मत्पदे लग्नः कान्तः किं? न हि नूपुरः"

४५ तद्गुणः "तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः"। च० "नयन् मधुलिहः श्वैत्यमुदंशुदशनांशुभिः"॥

४६ तुल्ययोगिता "वर्ण्यानामितरेषां वा धर्म्मैक्यं तुल्ययोगिता" "सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च"। सा त्रिधा। हिताहिते वृत्तितौल्यादपरा तुल्ययोगिता। "प्रदीयते पराभूतिर्मित्रशात्रवयोस्त्वया"। परा श्रेष्ठा भूतिरैश्वर्य्यं पराभूतिः पराभवश्च "गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता" च०। "लोकपालोयमः पाशी श्रीदः शक्रो भवानपि"। यमादिभिरुत्कृष्टैः लोकपालत्वेन समीकृतिरत्र।

४७ दीपकम् "वदन्ति वर्ण्यावर्ण्यानां धर्म्मैक्यं दीपकं बुधाः"। च० दर्पणे तु" अथ कारकमेकं स्यादनेकासु क्रियासु चेत्। "सती च योषित् प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि अत्र अनुगमनरूपैकक्रियासम्बन्धः वार्ण्यावर्ण्ययोः।

४८ दीपकावृत्तिः " त्रिविधा दीपकावृत्तिर्भवेदावृत्तिहेतुतः वस्तुनो वा स्वभावेन शक्तेर्वा हानिहेतुना। अकृतात्मीयकार्य्यः स्यादहेतुर्व्याहतस्तु यः" स० क०। "न विरचिता ललाटतटन्तत्र करीभ्रुकुटी न परुषहुङ्कृतेन मृदुस्मितमन्तरितम्। न तव निशुम्भसंभ्रमवशादपि दारुणया भगवति! चेष्टया कलुषितं वदनाम्बुजम्"। अत्र कालुष्यस्य कारणे सत्यपि तज्जनने यदसामर्थ्यं तत्र त्वन्मुखाम्बुज वस्तुनः स्वभावोनिमित्तमतो न विशेषोक्तेरभेदः। शक्तिहानितोयथा। "अनुरागवती सन्ध्या दिवसस्च पुरस्सरः। अहो दैवगतिश्चित्रा तथापि न समागमः"॥ अत्र दैवगत्या विद्यमानस्यापि समागमसामर्थ्यस्य कुण्ठीकरणात् हेतुशक्तिहानिकृतम् दीपकम्। पदपदार्थोभयावृत्तिभेदात्त्रैविध्यमुक्तं चन्द्रालोके। यथा। "वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः। माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखाबलाः"

४९ दृष्टान्तः दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिबिम्बनम्। सा० द० स च साधर्म्यवैधर्म्माभ्यां द्विधा। "तत्र साधर्म्ये अविदितं गुणापि सत्कविभणितिः कर्णेषु वमति मधुरधाराम्। अनधिगत परिमलापि हि हरति दृशं मालतीमाला," । वैधर्म्ये। त्वयि दृष्टे कुरङ्गाक्ष्याः स्रंसते मदनव्यथा। दृष्टोनुदयभाजीन्दौ ग्लानिः कुमुदसंहते "।

५० निदर्शना "सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्। यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना"॥ सा० द० अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना यथा। "कोऽत्र भूमिवलये जनान् मुधा तापयन् सुचिरमेति सम्पदम्। वेदयन्निति दिनेन भानुमानाससाद चरमाचलं ततः"॥ अत्र रवेरीदृशार्थवेदनक्रियायां कर्तृत्वेनान्वयः सम्बद्धत्येव ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपधर्म्मवत्त्वात्, स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति। असम्भवद्वस्तुसम्बन्धनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा। "कलयति कुवलयमालाललितं कुटिलः कटाक्षविक्षेपः। अधरः किसलयलीलामाननमस्याः कलानिधेर्विलासम्"॥ अत्रान्यस्य धर्म्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति यथा वा। "प्रयाणे तव राजेन्द्र! मुक्ता वैरिमृगीदृशाम्। राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः"॥ अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते, स चासम्भवन् राजहंसगतिमिव गतिं बोधयति। अनेकवाक्यगा यथा। "इदं किलाव्याजमनोहरं वपुस्तपः क्षमं साधयितुं य इच्छति। ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति" अत्र यत्तच्छब्दस्यनिर्द्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपःक्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति।

५१ निरुक्तिः "निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम्"। "दृशैश्चरितैर्जाने सत्यं दोषाकरोविभो"। दोषाकरस्य रात्रिकरस्य दोषाणामाकरत्वरूपान्यार्थकल्पनमिह।

५२ निश्चयः "अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः"। च० "वदनमिदं न सरोजं नयने नेन्दीवरे एतौ। इह सविधे मुग्धदृशो मधुकर! न मुधा परिभ्राम्य"।

५३ निषेधाभासः। आक्षेपभेदः विध्याभासे ४० पृष्ठे विवृतिः।

५४ परिकरः "उक्तिर्विशेषणैः साभिप्रायैः परिकरोमतः"। च० "सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः"।

५५ परिकराङ्कुरः "साभिप्रायोविशेष्यश्चेत् भवेत् परिकराङ्कुरः"। च० "चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः"

५६ परिणामः "विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि। परिणामोभवेत्तुल्यातुल्याधिकरणोद्विधा"। सा० द० "स्मितेनोपायनं दूरादागतस्य कृतं मम। स्तनोपपीडमाश्लेषः कृतोद्यूते पणस्तया" अन्यत्र पणोपायने वसनाभरणादिना